# अनुबन्धविशेषः (MoU)

## एकदिवसीयराष्ट्रियविचारगोष्ठी निवृत्तनिदेशकाभिनन्दनञ्च

(०४/०७/२०२५)





### शास्त्रशिक्षाशास्त्रयोः अपृथगत्त्वमपभ्युपेयम्

**- आचार्यः श्रीनिवासः वरखेडी**

केन्द्रीयसंस्कृतविश्वविद्यालयस्य जयपुरपरिसरे शिक्षाशास्त्रस्य दशां दिशां चाधिकृत्य एकदिवसीय-राष्ट्रियविचारगोष्ठी ( ०४/०७/२०२५) चर्चासत्रं निवृत्तनिदेशकानां सुदेशशर्मवर्याणां सम्माननादिकं च समायोजितमासीत्। अस्यामेव गोष्ठ्यां विश्वविद्यालयस्य इटलीदेशस्थेन एकाडेमिया विवेरं नोवम् इत्यनेन भाषासंस्थानेन सह अनुबन्धोऽपि (MoU) जातः। संविज्ज्ञापकस्योपरि संस्थाप्रमुखाः हस्ताङ्क्षरमपि सभामुखमकुर्वन्।



शास्त्रीयभाषासु तत्रापि ल्याटिन् भाषायाः प्राचीनग्रीकभाषासाहित्ययोश्च अभ्युत्थानाय अनेन संस्थानेन उताहो अध्ययनकेन्द्रेण क्रियमाणानि कार्याणि अनुसरणयोग्यानि सन्ति। अनेन अनुबन्धेन इतः परं ग्रीक् - ल्याटिन् भाषाभ्यां सह संस्कृतस्यापि अध्ययनं वैश्विकानुरागिणः कर्तुं प्रभविष्यन्ति इति विशेषः। निःशुल्कावासभोजनछात्रवृत्यादीनि अतिविशिष्टसौकर्याणि पूर्वोक्तसंस्थानेन कल्पितानि सन्तीति वैश्विकं तथ्यम्। इतः परम् उभाभ्यां संस्थानाभ्यां सम्भूय प्राचीनभाषाणां प्रोन्नयनाय यत्नः विधीयते इति विज्ञाय सर्वे सन्तुष्टाः ।



मुख्यभाषणे कुलगुरवः आचार्याः श्रीनिवासवरखेडीवर्याः अवोचन् यत् साङ्ख्य-योगयोः अपृथगत्त्वं यथा गीताचार्येण उक्तं तथैव शास्त्रशिक्षा शिक्षाशास्त्रशिक्षा च अभिन्ने इति सर्वैः भावनीयम्। पृथक् पृथक् इति भावना यदि कस्यापि अस्ति तर्हि सा सद्यः वारणीया। वस्तुतः एषः विश्वविद्यालयस्य निर्णयः। अत्र सन्देहः न कस्यापि स्यात्। शास्त्रचिन्ता शिक्षाशास्त्रचिन्ता च सम्भूय प्रवर्तेत।

पुनश्च एकीकृतशिक्षकशिक्षायाः महान् प्रभावः वर्तते। नीतावपि स्पष्टमिदमेव। चतुर्वर्षीय-पाठ्यक्रमस्य अध्ययने बालानां पुनश्च तस्य अध्यापने नवाचाराणां क्रियान्वयने च सर्वेषां शिक्षकाणां आसक्तिः भवेत्। इतःपरं शिक्षाशास्त्रज्ञाः समस्यासमाधानविधिम् आश्रित्य कार्याणि कुर्युः। सद्यः प्रकाशिते शिक्षासारसङ्ग्रहेऽपि एतद्विषये उल्लेखः नास्ति। अतः एतद्विषये शिक्षाशास्त्रज्ञाः दत्तावधानाः भवेयुः। एवमेव विद्यास्थानेऽस्मिन् सामूहिककार्यविषये बलं दीयते। दलकार्यमपि आरम्भणीयं येन निर्दिष्टं नवफलं लभ्यते । किञ्च




इति विद्यायाः कालचतुष्टयं पूर्वजैः निर्धारितमस्ति। अत्रापि शास्त्रिभिः शिक्षाशास्त्रिभिश्च ध्यानं देयम् ।

अन्ते चोक्तं यत् संस्कृतच्छात्राः संस्कृतेन सह ग्रीक् - ल्याटिन् इति भाषाद्वये अध्ययनं कर्तुम् इच्छन्ति तर्हि विश्वविद्यालयः अवसरं प्रकल्पयिष्यतीति। इटलीतः आगताः संस्थानप्रमुखाः तत्रापि संस्कृताध्ययनाय अग्रे अवसरं कल्पयिष्यन्तीति विश्वासः मम इत्यपि सभायामवोचन्। सद्यः निवृत्तान् आचार्यसुदेशकुमारशर्मवर्यान् ते अभ्यनन्दन्।

ग्रीक्- ल्याटिन् भाषाविदम् आनन्दवर्धनन्यौपानेवर्यं सभायामेव सत्कृत्य अमूदृक्षाः शताधिकाः आनन्दवर्धनाः ( विश्वविद्यालयस्य छात्राः ) भाविनि काले अत्रापि नयनातिथयः भूयासुः इत्याशिषा सर्वान् छात्रान् अन्वगृह्णन्।

समानशीलसंस्थानद्वयेन सम्भूय प्राचीनभाषासाहित्ययोः हितमेव सम्पादनीयमित्यत्र उभयसंस्थाप्रमुखानामैकमतमत्र सभायां दृष्टम् ।



सभाध्यक्षाः आचार्याः वाई.एस.रमेशवर्याः अवदन् यत् संस्कृतेन धाराप्रवाहरूपेण वक्तुमपेक्षितं सामर्थ्यं सर्वे अर्जयन्तु , तेन केवलं स्वदेशे एव न अपि तु विदेशेषु अस्माकं छात्राः नैकान् अवसरान् कालान्तरे प्राप्स्यन्ति। एषः अस्माकं विश्वविद्यालयनाथस्य मनोरथः। तत्पूर्तये सज्जाः भवन्तु संस्कृतच्छात्राः इति। किञ्च ग्रीक् - ल्याटिन् भाषयोः श्रवणावसरः अद्य परिसरे लब्धः। एषः विकासोन्मुखः मार्गः/ अवसरः वर्तते इति।

सभायां निवृत्तनिदेशकाः आचार्यसुदेशकुमारशर्मवर्याः आचार्यचांदकिरणसलूजावर्याः आचार्यकाशीनाथन्यौपानेवर्याः आचार्यमदनमोहनझावर्याः आचार्यमुरलीकृष्णवर्याः आचार्याः मधुकेश्वरभट्टकुलदीपशर्मनारायणसिंहगणेशपण्डितादयः उपस्थिताः आसन् ।



विचारगोष्ठ्याः समनन्तरम् आचार्यसुदेशकुमारशर्मवर्याणां अभिनन्दनकार्यक्रमोऽपि समायोजितः। अस्मिन् कार्यक्रमे भोपालपरिसरनिदेशकाः आचार्यरमाकान्तपाण्डेयवर्याः जम्मूपरिसरप्राचार्याः आचार्यश्रीधरमिश्रवर्याः भूतपूर्वप्राचार्याः अर्कनाथ-चौधरीमहोदयाः गोपीनाथशर्माणः अन्ये चापि बहवो हि विद्वांसः विदुष्यः उपस्थिताः । कुलपतयः आचार्याः श्रीनिवासवरखेडीवर्याः शुभाशयान् व्याहरन्।



सुदेशकुमारशर्मणां धर्मपत्नी आचार्या भगवतीसुदेशवर्या अपि साश्रु स्वाभिप्रायं प्राकटयत्।

सर्वान्ते सुदेशवर्याः वृत्तिजीवनस्य उच्चावचतां सरलैः शब्दैः प्रास्तुवन्। माध्यमिकस्तरात् वरिष्ठाचार्यस्तरं प्रविश्य कृतानि कार्याण्यपि ते सभामुखमब्रुवन्। तेषां व्यावसायिकम् इतिवृत्तं दृश्यकणिकारूपेण जवनिकायां समायोजकैः प्रदर्शितम्। परिसरप्राध्यापकैः लिखितानि पुस्तकानि लोकार्पितानि। संस्कृतोद्यानविषये डा. डम्बरुधरपतिवर्यैण सुष्ठु प्रतिपादितानि। डा.विनोदकुमारशर्मा डा. कैलाशसैनी डा. प्रमोदकुमारबुटोलिया आयुष्मान् आनन्दवर्धनः इत्यादयः सभासञ्चालननिर्वहणादिषु कार्येषु संलग्नाः आसन्।








सायं बन्धुमित्रहितैषिणां निमित्तं सुदेशदम्पतीभ्यां प्रीतिभोजनस्य व्यवस्था परिकल्पिता।







**आचार्यः गणेशतिम्मणणपण्डितः**

**सहयोगः – डॉ. अमृताकौर**
**डॉ. कैलाशसैनी**
**डॉ. विजयदाधीचः**
**डॉ. विनोदकुमारः**
**डॉ. प्रमोदकुमारबुटोलिया**
**डॉ. देवकरणः**